# तत्त्वदीपः

संस्कृत-संशोधन-संसत्-पत्रिका

# Tattvadīpaḥ



Journal of Academy of Sanskrit Research

Volume XXV No. 3&4 July-December 2019

Academy of Sanskrit Research

Karnataka Samskrit University

Melkote-571431

Estd. 1977

# श्रीमन्मित्रमिश्रविरचितस्य आनन्दकन्दचम्पूकाव्यस्य परिचयः

श्री एम्. एस्. नारायणस्वामी

## उपोद्घातः

संस्कृतभाषा देवभाषा, वेदभाषा, मधुरभाषा, गीर्वाणभाषा सर्वजनानां भाषा, प्रापञ्चिकभाषा च इति आधुनिकयुगे जनाः कथयन्ति । किमर्थम् इति चेत्? नवभारतनिर्माणार्थं संस्कृते काव्यानां पात्रम् अद्वितीयम् अस्ति । संस्कृतसाहित्ये बहूनि काव्यानि वर्तन्ते । तानि उपजीव्यकाव्यानि - **रामायणम्, महाभारतम्, श्रीमद्भागवतम् च इति । काव्यवाङ्मयेलौकिककाव्यानि, श्रव्यकाव्यानि इति । तथा महाकाव्यानि-कुमारसम्भवम्, रघुवंशम्, नैषधीयचरितम्, किरातार्जुनीयम्, शिशुपालवधम्** च अन्यानि महाकाव्यानि उपलभ्यन्ते । **कालिदासेन** विरचितखण्डकाव्यद्वयम् - **मेघदूतम्, ऋतुसंहारश्च** इति । गद्य काव्ये द्विविधेकथाकाव्यानि, आख्यायिकाश्चेति । तथा चम्पूकाव्येषु विविधवैविध्यमयानि चम्पूकाव्यानि उपलभ्यन्ते । तेषु - **भवभूतेः** उत्तररामचरितम्, त्रिविक्रमभट्टस्य नलचम्पूः, अभिनव कालिदासस्य भागवतचम्पूः, भोजराजेन विरचितं चम्पूरामायणम्, **नारायणरामाचार्यस्य** चम्पूभारतम्, भगवतभूषणस्य श्रीगोपालचम्पू, **राघवन्, वि. वर्यस्य** आनन्दगंगचम्पूश्चेति अन्यानि चम्पूकाव्यानि संस्कृतसाहित्यक्षेत्रे उपलभ्यन्ते । तेषु काव्येषु "आनन्दकन्दचम्पूकाव्यस्य गूडार्थदीपिकाटीकायाः" इति व्याख्यानरूपेण उपलब्धमातृकाणां सम्पादनम् । अयं काव्यम् विद्यावारिद्युपाधेः निमित्तं मया स्वीकृतम् । तथा मूलग्रन्थः आनन्दकन्दचम्पूकाव्यम् अस्ति । तं श्रीमन्मित्रमिश्रः अस्य ग्रन्थस्य गूडार्थदीपिकाटीकायाः प्रणेतारः अयं आनन्दकन्दचम्पूकाव्यम् । अयं ग्रन्थ-सर्वकारसंस्कृतग्रन्थालये काशीनगरे प्रकटितः । किन्तु गूडार्थदीपिकाटीकायाः व्याख्यानम् अद्यापि न प्रकटितम् । अत एव आनन्दकन्दचम्पूकाव्यस्य विचाराणां ज्ञानसम्पादनम् एव मम आशयः । अत्र ममापि सौभाग्यं वर्तते इत्यत्र नास्ति संशयः । इयं मातृका मैसूरु नगरे प्राच्यविद्यासंशोधनालये देवनागरि - ग्रन्थलिप्यां वर्तते । तत् प्राप्तं च ।

दण्डिकविश्चम्पूकाव्यस्य लक्षणं लिखन् दृश्यते । एतेन तु चम्पूकाव्यानां रचना तस्मिन् काले वा तत्कालात् प्रागपि सञ्जातेति सिध्यति । अस्माकं संस्कृतसाहित्ये अनेकानि चम्पूकाव्यानि सन्ति । तेषु आनन्दकन्दचम्पूकाव्यमेकं । इदं काव्यम् संस्कृतसाहित्यक्षेत्रे बहुवैशिष्ट्यपूर्णमस्तीति । अस्य ग्रन्थस्य गूडार्थदीपिकाटीकायाः व्याख्यानम् श्रीमन्मित्रमिश्रः रचितवान् ।

अयं काव्ये रामायणमहाभारतस्य विविधाः विषयान् उपलभ्यते । अयं विषयम् आधुनिकसमाजस्या मानवाः ज्ञातुम् अवश्यकमस्तीति मम आशयः । अत एव नवभारतनिर्माणार्थं चम्पूकाव्यानि अवश्यकम् । तेन कारणेन चम्पूकाव्यस्योपरि मम आसक्तिः सञ्जातः । तत्रैव चम्पूकाव्यस्य अवगमने उपलब्धानि कानिचन व्याख्यानानि एव वर्तन्ते । गूडार्थदीपिकाटीका इति श्रीमन्मित्रमिश्र–विरचितव्याख्यानम् । अस्य ग्रन्थकाव्यस्य परिचयकरणम् अवश्यकम् अस्ति ।

## आनन्दकन्दचम्पूकाव्यस्य गूडार्था दीपिकाटीकायाः मातृकापरिचयः

उपलब्धमातृका तु "आनन्दकन्दचम्पूव्याख्या" इति नाम्नि ख्यातं वर्तते । आनन्दकन्दचम्पूकाव्यस्य श्रीमन्मित्रमिश्रविदुषाक्रियतेगूडार्थदीपिकाटीका इति प्रख्यातो वर्तते । एषा टीका तु मैसूरु नगरे मैसूरु विश्वविद्यालयस्य प्राच्यविद्यासंशोधनालये ग्रन्थसङ्ख्या E - 26951 C - 1811/a । (ORI) अस्मिन् ग्रन्थे 280 पृष्टानि उपलब्धानि । अस्यां मातृकायां प्रथमोल्लासत अष्टमोल्लासपर्यन्तंदेवनागरीलिप्यां उपलब्धम् । अमुं मूलग्रन्थम् जालपुटे अन्विष्य WWW. Ananda kanda champu.in Website मध्ये Title : The Princes Of Wales Sarswathi-Bhavana Texts, No. 36, The Ananda-Kanda-Champu, Author-1 : Kaviraja, Gopinatha E.D. Author-2 : NULL. Subject : Religion. Language : Sanskrit. Barcode : 4990010005409. Year : 1931. अस्य Digital Library Of India, Benares. अत्र उपलब्धम् । आनन्दकन्दचम्पूव्याख्यानस्य गूडार्थदीपिकाटीका इति व्याख्यानम् अष्टमः उल्लासाः वर्तन्ते । एतत् चम्पूकाव्यं प्रथमोल्लासतः अष्टमोल्लासपर्यन्तम् रामायण महाभारतमधिकृत्य गद्यपद्यमिश्रितं आनन्दकन्दचम्पूकाव्यम् इति प्रख्यातं वर्तते ।

## संस्कृतसाहित्यक्षेत्रे चम्पूकाव्यस्य वैशिष्ट्यलक्षणम्

संस्कृतवाङ्मये 'चम्पू' इत्येताम् अभिधां भजमानस्य काव्यस्य अवताराणां गद्यकाव्यानन्तरं संवृत्ता । काव्यं वस्तुतः गद्यकाव्यस्यैव उपबृहं प्रतीयते । तस्मात् तस्य जन्मगद्यकाव्यानन्तरं स्वाभाविकतया च सिध्यति । संस्कृतसाहित्ये गत्यर्थकाश्चौरादिकाश्चापि धातोरूपप्रत्यये विहिते **"चम्पूयति, चम्पति"** इति निष्पन्नश्चम्पूशब्दः काव्ये कदा निरुढ इति विवेके प्रस्तुते अग्निपुराणे उपलभ्यते । अत्र **"चम्पयति, चम्पति"** इति निष्पन्नश्चम्पूशब्दः, चमत्कृत्य पुनाति सहृदयान्यं विस्मितीकृत्य प्रसादयतीति चम्पूरिति हरिदासभट्टाचार्यः । यथा –

**"मिश्रं चम्पुरिति ख्यातं प्रकीर्णमिति च द्विधा ।**
**श्रव्यं चैवाभिनेयं च प्रकीर्णं सकलोक्तिभिः"** ॥
(३३६ अध्यायः ३६ श्लोकम्)


काव्यं तावत् त्रिधा–गद्यपद्यमिश्रभेदेभ्यः इति । अत्र गद्यपद्यमयं काव्यं चम्पूशब्दोच्यत इत्याशयः ।

क्रिस्ताब्दसप्तमशताब्द्यां दण्डिना काव्यादर्शे प्रथमोऽध्याये "गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते" इत्यादिना चम्पूशब्दः समादृतः । तथा सूक्ष्मेक्षिकयेदमपि विवेचितं तत्रैव यद् यदि राजस्तुतिर्गद्यपद्यमयी भवेत्तदा तत्र विरूद्शब्दो व्यवहार्यः इति । **"गद्यपद्यमयी काव्यं चम्पूरित्यभिधीयते"** । (इत्येतद् विहितं यत् तत्र लक्षणकारैरभिलष्यन्ते । यत् चम्पूकाव्ये भावात्मकानां विषयाणां वर्णनं पद्येषु स्यात् । किंच वर्णात्मकाणां विषयाणां विवरणं गद्येषु सम्भवत । एतद् द्विविधस्यैव सौन्दर्यस्य चम्पूषु वाञ्छितत्वात् भोजराजः ।) किंच दण्डिनैवं विशेषे प्रतिपादितेऽपि नाटकादावत् अतिव्याप्तिमाशङ्क्य द्वादश शताब्द्यां हेमचन्द्राचार्यः काव्यानुशासने चम्पूलक्षणं विस्तृतमस्ति इति उक्तवान् ।

1. त्रिविक्रमभट्टचरितं विवृतमस्माभिश्चम्पूदंतनिबन्धे ।
2. लेखोऽयं जनरल् बांबे ब्राञ्च् रायल एशियाटिक् सोसैटि भागे १८ पृष्टेषु २५३–२६१ ।
3. अग्निपुराणे – ३३६ अध्यायः ३६ श्लोकम् ।
4. दण्डिनाः काव्यादर्शे प्रथमोऽध्याये ।

Language: Sanskrit. Barcode: 499001000 5409. Year: 1931. अस्य Digital Library Of India, Benares.

इत्यत्र उपलब्धम् । आनन्दकन्दचम्पूव्याख्यानस्य गूडार्थदीपिकाटीका इति व्याख्यानम् अस्ति । अत्र अष्ट उल्लासाः वर्तन्ते । इदं चम्पूकाव्यम् प्रथमोल्लासतः अष्टमोल्लासपर्यन्तं अस्ति । रामायण महाभारतमधिकृत्य गद्यपद्यमिश्रितं आनन्दकन्दचम्पूकाव्यम् इति प्रख्यातं वर्तते । अस्याः मातृकायाः छाया (स्वरूपं) एवं वर्तते ।



अस्याः मातृकायाः प्रारम्भिकभागे- (१) श्रीमद्रामपदाब्जा



(२) अस्याः मातृकायाः चरमभागे- (विवरणं अग्रिमपृष्ठे उल्लिखितम्)

---

१. अस्याः मातृकायाः हस्तप्रतिः देवनागरीलिप्यां वर्तते । इयं हस्तप्रतिः श्रीमन्मित्र- मिश्रविरचितायाः आनन्दकन्दचम्पूव्याख्यायाः गूडार्थदीपिकाटीकायाः प्रथमोल्लासे अस्ति ।

वक्तव्यमवशिष्टम् । धीरधीधुरीणेनानेन बहवो ग्रन्था निरमायिष्यत । तत्र वीरमित्रोदय ( धर्मशास्त्रनिबन्धे ) एव लक्षद्वयमिता श्लोकसंख्य कः वर्तते । अत्र वीरमित्रोदये प्रकरणपरिच्छेदका द्वाविंशतिप्रकाशाः समुल्लसन्ति । तेष्वादिमा अष्टप्रकाशास्तु काश्यां चौखाम्भासंस्कृतग्रन्थमालायां (चौखाम्भा संस्कृतसीरिज) मुद्रणामायिताः । श्रीमन्मित्रमिश्रः अनेकान् ग्रन्थान् रचितवान् । तेषु-

(१) वीरमित्रोदयः ( धर्मशास्त्रे निबन्धग्रन्थः )

एतस्य द्वाविंशतिप्रकाशास्त्विमे-

| | | | |
|---|---|---|---|
| १- परिभाषाप्रकाशः | २- संस्कारम् | ३- आह्निकम् | ४- पूजा |
| ५- प्रतिष्टा | ६- राजधर्मं | ७- व्यवहारं | ८- शुध्दिं |
| ९- श्राध्दं | १०- तीर्थं | ११- दानं | १२- व्रतं |
| १३- समयं | १४- ज्योतिषं | १५- शान्तिं | १६- कर्मविपाकम् |
| १७- चिकित्सा | १८- प्रायश्चित्त | १९- प्रकीर्णकं | २०- लक्षणं |
| २१- भक्तिं | २२- मोक्षप्रकाशः | | |

(२) याज्ञवल्क्यस्मृतिटीका (वीरमित्रोदयाख्या )

(३) वीरमित्रोदयः ( गणितग्रन्थः )

(३) आनन्दकन्दचम्पूश्चेति ।

समुचितपर्यालोचनेनायं विचारो दृढी भवति यन्मित्रमिश्रः पण्डितान्तर- द्वाराऽनेकान् ग्रन्थान्निर्मापयामासेति । यथा वीरमित्रोदयीयसंस्कारप्रकाश-निर्माता रामज्योतिर्वित् पण्डित इति स्पष्टं भण्डारकर महाशयसम्पादिते सूचीपत्रे (२) । वीरमित्रोदयाख्या याज्ञवल्क्यस्मृतिटीकापि तीरभुक्ति(मिथिला) निवासिना श्रीसदानन्दविदुषा विरचय्य मित्रमिश्रनाम्ना विख्यापिता ।

यथाचोक्तं याज्ञवल्क्यस्मृतिटीकाप्रारम्भ एव-

" उत्तंसस्तीरभुक्तेरखिलबुधगुरुः श्रीसदानन्दधीमान्

श्रीभाजो मित्रमिश्राज्जगदुपकृतये बिभ्रदादेशदीपम् ।
ज्ञानानांदैन्यदोषापहमकलिभयं याज्ञाल्क्योक्तिकोशाद् –
दृष्ट्वा स्मृत्यर्थसारं समुचिनुत यशो धर्मलक्ष्मीविहारम् ॥" इति ।

### ❖ मित्रमिश्रवंशवृक्षः । (ग्वालियरवासी शाण्डिल्यगोत्री)

श्रीहंसमिश्रः (दूरवारकुलीनः)

परशुराममिश्रः ( सनाढ्यब्राह्मणः)

वीरेश्वरः　चक्रपाणिः　मित्रमिश्रः　योगादित्यः

सुनीतिः (कन्या)

श्रीमन्मित्रमिश्रः परशुराममिश्रस्य पञ्चमपुत्रेषु तृतीयःपुत्रैव । अयं पुत्रः मित्रमिश्रविभूषितो वीरसिंहः इति प्रख्यातो आसीत् । एषः ओरछाधिपति- वीरसिंहोऽसौ बुन्देलाभिधक्षत्रियवंशावतंसः सकलराजन्योत्तसंसः संस्कृतभाषप्रेमा परमधार्मिकश्चासीत् । वंशास्य बुन्देलाख्या कथं कदा प्रववृत्त इति पर्यालोचने प्राचीनेयं ।

**आनन्दकन्दचम्पूनिर्माणकालः ।**

यद्यपि मित्रमिश्रसमये विदिते काव्यास्यापि समयो निर्णीत एव, तथापि सूक्ष्मविचारोऽयं मनसि समुल्लसति ।

तथाहि मित्रमिश्रः स्वयमेव ग्रन्थावसाने ग्रन्थनिर्माणसमयमस्फोरयत् । यथा –

प्राप्य श्रीमित्रमिश्रोऽयमतमिस्रत्रयोदशीम् ।
अतुलां स तुलां सूरे गते चम्पूमपूरयत् ॥ (८ उ.१०४ )
मीनारोहिणि सहचरे कृत्वान्तिके रेवर्ती
याते चण्डमरीचिमालिनि तुलां वारे च वाचस्पतेः ॥
शाके शाङ्कगजर्तुभूपरिमिते ह्यानन्दकन्दाभिधां
चम्पूं पूरितवान्सितस्मरतिथौ श्रीमैत्रमिश्रः कृती ॥१०५॥

अत्रायं विवाद उपतिष्टते । शकवत्सरस्य सप्तदशशताब्द्यां (=ख्रिस्ताब्द- स्याष्टादशशताब्द्यां) मित्रमिश्रस्यावस्थितिरसम्भविनी । यतो हि मित्रमिश्रस्य सत्ता बुन्देलभूपालवीरसिंहसमये निश्चितैव । वीरसिंहराज्य-कालोऽपि च यवनसाम्राज्यजहंगीरराज्यकाले १६०५-१६२७ ख्रिस्ताब्दावधिक इत्यपि प्रमाणानां शतं निश्चाययति । एवं सत्यांविप्रतिपत्तौ श्लोकोक्तः शाक-शब्दः केवलं वत्सरार्थवाची बोध्दव्यः । गृह्यते च ज्योतिर्विद्भिः शाकशब्दः संवत्सरार्थकोऽपि । ततश्चायमर्थः प्रतिभासते, यद्ययं ग्रन्थो विक्रमवत्सरस्य सप्तदशशताब्द्यां निर्मितं इति ।

**श्रीमन्मित्रमिश्रस्य समयः**

वीरसिंहराज्यकाले समुपस्थित्या यद्यपि मित्रमिश्रस्य समयो १६०५ - १६२७ क्रिस्ताब्दं यावन्निर्णीत एव वर्तते । तथापि सूक्ष्मेक्षिकया विचार्यमाणे मीमांसेयमुल्लासति यन्मित्रमिश्रो न केवलं वीरसिंहराज्यकाले एव समुपस्थितः अपि तु तत्पुत्रपौत्रादिराज्यकालेपीति ।

वीरमित्रोदयीयपरिभाषाप्रकाशे श्रीमता मित्रमिश्रेन बुन्देल महाराजा -नामन्ववाय इत्थं प्रदर्शितः ।

**मेदनीमल्लः(काशीराजवंशयः)**

।

**अर्जुनः**

।

**मलखानः**

।

**प्रतापरुद्रः ( ओरछाप्रतिष्टापकः)**

।

**मधुकरशाहः**

।

**वीरसिंहदेवः(श्रीमन्मित्रमिश्रविभूषितः)**

।

**जुझारसिंहः**

।

**श्रीविक्रमादित्यः**

।

नरसिंहदेवः ( ६-२७ यावत्पद्यानि ) अत्र यद्यपि विक्रमादित्यनरसिंह-देवनामनी इम्पीरियल् गजेटियरग्रन्थे नोपलभ्यते, तथापि- विक्रमादित्यस्य, जुझारसिंहतनयतया निर्देशः फारसीग्रन्थे " ३ मआसि रुल्- उमरा" नामकोऽपि समधिगम्यते । जोगराजापरनामा विक्रमादित्यः १६६६ वैक्रमाब्दे समुत्पन्न इत्यपि च निर्णी ४ यते ।

किं च जुझारसिंहस्य पौत्रतया नरसिंहदेवस्य समुल्लेखं खफीखांनिर्मिते फारसीग्रन्थेऽपि विलोकयामः ५ । इत्थं श्रीमन्मित्रमिश्र ईशवीयसप्तदशताब्द्या द्वितीयभागे समुपस्थित आसीदितिनिश्चप्रचम् ।

**उपसंहारः**

इदं काव्यं यदस्ति "आनन्दकन्दचम्पू काव्यस्य व्याख्याख्याः गूढार्थ-दीपिकाटीकायाः मातृकापरिचयम् इति कविना विदुषा च श्रीमन्मित्रमिश्रेन विरचितं वर्तते । अस्य काव्यस्य अवलोकनेन ज्ञायते यत् रचना शैली, अलङ्काराः रसाः, रीत्यः, ध्वनिः भूयिष्टेन दरीदृष्यते । एषा मातृका तु महत्वपूर्णं स्थानं लभते इति मम मनीषा । एवं च अस्याः मातृकायाः अध्ययनेन सम्पादनेन च लोकाय तथा शोधछात्राणां कृते महात् प्रयोजनं वर्तते मम अभिप्रायः ।

## * आकरग्रन्थाः

| ग्रन्थनाम | रचयिता | सम्पादकः | प्रकाशनम् | प्रकाशन कालः |
|---|---|---|---|---|
| आनन्दकन्द-चम्पूकाव्यम् | श्रीमन् मित्रमिश्रः | श्रीनन्दकिशोरशर्मा (साहित्याचार्यः) | श्रीसरस्वती भवनसीरिस् बनारस | १९३१ |

---

३. म आसिरुल्-उमरा, पारसी, जि १, पृ- ७२९ ।

४. नागरीप्रचारिणीपत्रिका सं १९७७, पृ-११७, २०२ ।

५. खफीखां, जि १, प- ५१९, पृ- ५२३ ।

| ग्रन्थनाम | रचयिता | सम्पादकः | प्रकाशनम् | प्रकाशन कालः |
|---|---|---|---|---|
| आनन्दकन्द-चम्पूव्याख्यानम् (गूडार्थदीपिका टीका) | श्रीमन् मित्रमिश्रः | श्रीमन्मित्रमिश्रः | वाराणसी | १९३१ |
| बालचरितचम्पूः | श्रीरामानुजमिश्रः | श्रीरामानुजमिश्रः | चौखम्बा विद्याभवन वाराणसी | १९११ |
| चम्पूरामायणम् | भोजराजः | डा. सि. लक्ष्मी-नरसिंहमूर्ति | वाराणसी | १८८५ |
| चम्पूभारतम् | नारायणरामाचार्यः | | निर्णयसागर प्रेस् | १९१७ |

**श्री नारायणस्वामि एम्. एस्.**

शोधच्छात्रः

कर्नाटकसंस्कृतविश्वविद्यालयः

पम्पमहाकविमार्गः, चामराजपेटे-५६००१८

बेङ्गळूरु कर्नाटक

Mobil : 9483876731

E-mail : narayanaswamy76731@gmail.com

(**श्री नारायणस्वामि एम्. एस्.** महाभागः बेङ्गळूरु महानगरस्थे कर्नाटकसंस्कृत विश्वविद्यालयस्य सहायकप्राध्यापकानां **डा. विनायक नामण्णवर** महोदयानां मार्गदर्शनेन **"श्रीमन् मित्रमिश्रविरचितायाः आनन्दकन्दचम्पूव्याख्यायाः गूडार्थ-दीपिकाटीकायाः पाठसमीक्षात्मकं सम्पादनम्"** अस्मिन् विषये कर्नाटक संस्कृत विश्वविद्यालये संशोधनकर्मणि रतः ।)

********

TATTVADĪPAḤ
Research Journal of the Academy of Sanskrit Research, Melkote
(July-December)
from Melkote - 571 431
Karnataka, India.

Volume XXV Nos. 3 & 4 July-December 2019

© Academy of Sanskrit Research, Melkote - 571 431

The views expressed in the articles published in this journal are not necessarily the views of the Academy.

Reproduction of articles published in this journal, either in part or full, needs written permission from the Director of the Academy.

ISSN. No. 2321-7715

Price : Rs. ₹ 120/-

Printed and Published by The Registrar (Admin.) on behalf of the Academy of Sanskrit Research (owner), at the Academy of Sanskrit Research, Karnataka Samskruta University Melkote - 571 431
Reg.No.67495/97

ॐ ISSN 2250-1711

सत्यं ज्ञानमनन्तम्

# Journal of Veda Saṁskṛta Academy

## A National Peer-Reviewed Research Journal

मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

Volume : XVI
July to December - 2020

वेद संस्कृत अकाडेमि (पं.)
VEDA SAṀSKṚTA ACADEMY (R.)
सत्यं ज्ञानमनन्तम्
ವೇದ ಸಂಸ್ಕೃತ ಅಕಾಡೆಮಿ (ನೋ.)

*Edited by the Director :*
**Dr. Gopalkrishna Hegde**
Jyotishashastra-Dharmashastra Vidwan

VEDA SAMSKRITA ACADEMY (R.)
Kalkod Road, Hegde - 581330, KUMTA, Uttara Kannada, Karnataka.

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# श्रीमन्मित्रमिश्रविरचितायाः आनन्दकन्दचम्पूकाव्यस्य व्याख्यायाः गूडार्थदीपिकाटीकायाः मातृकापरिचयः

- श्री नारायणस्वामि एम्.एस्. (बेङ्गळूरु)•

**• पीठिका -**

अस्माकं भारतस्य विविधेषु राज्येषु बहूनि संस्कृत संशोधन केन्द्राणि सन्ति । तत्र पालि, प्राकृत, देवनागरी, तेलगु, हिन्दी, मराठि, तमिळु, मलयाळं इत्येतासु, भाषासु हस्तप्रतयः उपलभ्यन्ते । एतेषु हस्तप्रतिषु देवनागरीलिप्यां एकः हस्तप्रतिः O R I मध्ये मैसूरुनगरे उपलभ्यते । इयं हस्तप्रतिः आनन्दकन्दचम्पूव्याख्यायाः गूडार्थदीपिकाटीका इति । इदं काव्यम् श्रीमन्मित्रमिश्रेन विरचितं वर्तते । इदं काव्यं सहृदयान् आनन्दयितुं समर्थकाव्यं वर्तते । श्रीमन्मित्रवर्यः बहु सरळतया मन्दमतीनामपि अवगमनं भवेत् तथा विरचितवान् वर्तते । अस्यां मातृकायां कुत्रचित् वर्णानां लोपः तथा प्रनष्टाः पादाः वाक्यानि च तत्र तत्र दृष्यन्ते तथापि यथा च सम्पादनं कर्तुं प्रयत्नं मया कृतः वर्तते ।

**• आनन्दकन्दचम्पूकाव्यस्य गूडार्थदीपिकाटीकायाः मातृकापरिचयः**

उपलब्धमातृका तु "आनन्दकन्दचम्पूव्याख्या" इति नाम्नि ख्यातं वर्तते । आनन्दकन्दचम्पूकाव्यस्य श्रीमन्मित्रमिश्रविदुषाक्रियतेगूडार्थ-दीपिकाटीका इति प्रख्यातो वर्तते । एषा टीका तु मैसूरु नगरे मैसूरु विश्वविद्यालयस्य प्राच्यविद्यासंशोधनालये ग्रन्थ सङ्ख्या E – 26951 C – 1811/a । (ORI) अस्मिन् ग्रन्थे 280 पृष्टानि उपलब्धानि । अस्यां मातृकायां प्रथमोल्लासतः अष्टमोल्लासपर्यन्तं देवनागरीलिप्यां उपलब्धम् । अमुं मूलग्रन्थम् जालपुटे अन्विष्य WWW. Ananda kanda champu.in Website मध्ये Title: The Princes Of Wales Sarswathi-Bhavana Texts, No. 36, The Ananda-Kanda-Champu, Author-1: Kaviraja,Gopinatha E.D. Author-2: NULL. Subject: Religion.

## संस्कृतसाहित्यक्षेत्रे चम्पूकाव्यस्य वैशिष्ट्यलक्षणम्

संस्कृतवाङ्मये 'चम्पू' इत्येताम् अभिधां भजमानस्य काव्यस्य अवताराणां गद्यकाव्यानन्तरं संवृत्ता । काव्यं वस्तुतः गद्यकाव्यस्यैव उपबृहं प्रतीयते । तस्मात् तस्य जन्मगद्यकाव्यानन्तरं स्वाभाविकतया च सिध्यति । संस्कृतसाहित्ये गत्यर्थकाश्चौरादिकाश्चापि धातोरूपप्रत्यये विहिते **"चम्पूयति, चम्पति"** इति निष्पन्नश्चम्पूशब्दः काव्ये कदा निरुढ इति विवेके प्रस्तुते अग्निपुराणे उपलभ्यते । अत्र **"चम्पयति, चम्पति"** इति निष्पन्नश्चम्पूशब्दः, चमत्कृत्य पुनाति सहृदयान्यं विस्मितीकृत्य प्रसादयतीति चम्पूरिति हरिदासभट्टाचार्यः । यथा –

**"मिश्रं चम्पुरिति ख्यातं प्रकीर्णमिति च द्विधा ।**
**श्रव्यं चैवाभिनेयं च प्रकीर्णं सकलोक्तिभिः"** ॥

(३३६ अध्यायः ३६ श्लोकम्)

काव्यं तावत् त्रिधा–गद्यपद्यमिश्रभेदेभ्यः इति । अत्र गद्यपद्यमयं काव्यं चम्पूशब्दोच्यत इत्याशयः ।

क्रिस्ताब्दसप्तमशताब्द्यां दण्डिना काव्यादर्शे प्रथमोऽध्याये "गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते" इत्यादिना चम्पूशब्दः समादृतः । तथा सूक्ष्मेक्षिकयेदमपि विवेचितं तत्रैव यद् यदि राजस्तुतिर्गद्यपद्यमयी भवेत्तदा तत्र विरूद्शब्दो व्यवहार्यः इति । **"गद्यपद्यमयी काव्यं चम्पूरित्यभिधीयते"** । (इत्येतद् विहितं यत् तत्र लक्षणकारैरभिलष्यन्ते । यत् चम्पूकाव्ये भावात्मकानां विषयाणां वर्णनं पद्येषु स्यात् । किंच वर्णात्मकाणां विषयाणां विवरणं गद्येषु सम्भवत । एतद् द्विविधस्यैव सौन्दर्यस्य चम्पूषु वाञ्छितत्वात् भोजराजः ।) किंच दण्डिनैवं विशेषे प्रतिपादितेऽपि नाटकादावत् अतिव्याप्तिमाशङ्क्य द्वादश शताब्द्यां हेमचन्द्राचार्यः काव्यानुशासने चम्पूलक्षणं विस्तृतमस्ति इति उक्तवान् ।

1. त्रिविक्रमभट्टचरितं विवृतमस्माभिश्चम्पूदंतनिबन्धे ।
2. लेखोऽयं जनरल् बांबे ब्राञ्च् रायल एशियाटिक् सोसैटि भागे १८ पृष्टेषु २५३–२६१ ।
3. अग्निपुराणे – ३३६ अध्यायः ३६ श्लोकम् ।
4. दण्डिनाः काव्यादर्शे प्रथमोऽध्याये ।

अस्मिन् काव्ये काव्यप्रयोजनम्, काव्यकारणम्, प्रतिभाभेदौ, प्रतिभासंस्कारः, व्युत्पत्तिः, अभ्यासः, शिक्षा, काव्यस्वरूपम् इत्यादयः विचाराः वर्तन्ते ।

एतेषु काव्यवैशिष्ट्यलक्षणं नवभारतनिर्माणे अद्वितीयमस्ति इति मम अभिप्रायः ।

1. "शब्दानुशासने"ऽस्माभिध साध्यो वाचो विवेचिताः ।

तासामिदानीं काव्यत्वं यथावदनुशिष्यते ॥ इति काव्यलक्षणप्रयोजनं हेमचन्द्राचार्यः वदति । काव्यम् आनन्दाय यशसे कान्तातुल्यतय उपदेशाय च । लोकोत्तरं कविकर्म काव्यम् । यथा –

'प्रज्ञा नवनवोल्लेखशालिनी प्रतिभा मता । तदनुप्राणना जीवद् वर्णनानिपुणः कविः । तस्य कर्म स्मृतं काव्यम्' ॥ इति । सद्यो रसास्वादजन्मा निरस्तवेद्यान्तरा ब्रह्मास्वादसदृशी प्रीतिः आनन्दः । इदं सर्वप्रयोजन उपनिषज्भूतं कविसहृदययोः काव्यप्रयोजनम् । यशस्तु कवेरेव । यत इयति संसारे चिरातीता अप्यद्य यावत्कालिदासादयः सहृदयैः स्तूयन्ते कवयः । प्रभुतुल्येभ्यः शब्दप्रदानेभ्यो वेदागमादिशास्त्रेभ्यो मित्रसंमितेभ्योऽर्थप्रधानेभ्यः पुराणप्रकरणादिभ्यश्च शब्दार्थयोर्गुणभावे च रसप्राधान्ये च विलक्षणं काव्यं कान्तेव सरसतापादनेन संमुखीकृत्य रामादिवद् वर्तितव्यं न रावणादिवत् इत्युपदिशतीति सहृदयानां प्रयोजनम् । यः काव्यं कुरुते स कविः । यस्य तु काव्यानुशीलना अभ्यासवशादि वशदीभूते मनोमुकरे वर्णनीयतन्मयीभवना योग्यतासहृदयसंवादभाक् स सहृदयः इति । अत एव नवभारत निर्माणे चम्पूकावस्य प्रभावः अद्वितीयमस्ति ।

अत्र यद्यपि "मिश्रं वपुरिति ख्यातं" इति पाठः समुपलभ्यते तथापि सोऽपि पपाठः इति चम्पूकाव्यम् ।

2. "गद्यानुबन्धरसमिश्रितपद्यसूक्तिः –
हृद्यापि वाद्यकलय कलितेव गीतिः ।
तस्माद् दधातु कविमार्गजुषां सुखाय –
चम्पूप्रबन्धरचनां रसना मदीया" ॥ इति ॥ इत्याचाख्यौ । चम्पूरामायणस्य बालकाण्डे दरीदृश्यते । साम्प्रतं यानि चम्पूकाव्यान् उपलभ्यन्ते तानि सन्ति इति दशमशतकार्वाकालगामीनि । परं षष्ठे शतके सम्भूतोहि काव्यादर्शकारः

दण्डिकविश्चम्पूकाव्यस्य लक्षणं लिखन् दृश्यते । एतेन तु चम्पूकाव्यानां रचना तस्मिन् काले वा तत्कालात् प्रागपि सञ्जातेति सिध्यति । अस्माकं संस्कृतसाहित्ये अनेकानि चम्पूकाव्यानि सन्ति । तेषु आनन्दकन्दचम्पूकाव्यमेकं । इदं काव्यम् संस्कृतसाहित्यक्षेत्रे बहुवैशिष्ट्यपूर्णमस्तीति । अस्य ग्रन्थस्य गूडार्थदीपिकाटीकायाः व्याख्यानम् श्रीमन्मित्रमिश्रः रचितवान् ।

अयं काव्ये रामायणमहाभारतस्य विविधाः विषयान् उपलभ्यते । अयं विषयम् आधुनिकसमाजस्या मानवाः ज्ञातुम् अवश्यकमस्तीति मम आशयः । अत एव नवभारतनिर्माणार्थं चम्पूकाव्यानि अवश्यकम् । तेन कारणेन चम्पूकाव्यस्योपरि मम आसक्तिः सञ्जातः । तत्रैव चम्पूकाव्यस्य अवगमने उपलब्धानि कानिचन व्याख्यानानि एव वर्तन्ते । गूडार्थदीपिकाटीका इति श्रीमन्मित्रमिश्र–विरचितव्याख्यानम् । अस्य ग्रन्थकाव्यस्य परिचयकरणम् अवश्यकम् अस्ति ।

### आनन्दकन्दचम्पूकाव्यस्य गूडार्था दीपिकाटीकायाः मातृकापरिचयः

उपलब्धमातृका तु "आनन्दकन्दचम्पूव्याख्या" इति नाम्नि ख्यातं वर्तते । आनन्दकन्दचम्पूकाव्यस्य श्रीमन्मित्रमिश्रविदुषाक्रियतेगूडार्थदीपिकाटीका इति प्रख्यातो वर्तते । एषा टीका तु मैसूरु नगरे मैसूरु विश्वविद्यालयस्य प्राच्यविद्यासंशोधनालये ग्रन्थसङ्ख्या E - 26951 C - 1811/a । (ORI) अस्मिन् ग्रन्थे 280 पृष्ठानि उपलब्धानि । अस्यां मातृकायां प्रथमोल्लासत अष्टमोल्लासपर्यन्तंदेवनागरीलिप्यां उपलब्धम् । अमुं मूलग्रन्थम् जालपुटे अन्विष्य WWW. Ananda kanda champu.in Website मध्ये Title : The Princes Of Wales Sarswathi-Bhavana Texts, No. 36, The Ananda-Kanda-Champu, Author-1 : Kaviraja, Gopinatha E.D. Author-2 : NULL. Subject : Religion. Language : Sanskrit. Barcode : 4990010005409. Year : 1931. अस्य Digital Library Of India, Benares. अत्र उपलब्धम् । आनन्दकन्दचम्पूव्याख्यानस्य गूडार्थदीपिकाटीका इति व्याख्यानम् अष्टमः उल्लासाः वर्तन्ते । एतत् चम्पूकाव्यं प्रथमोल्लासतः अष्टमोल्लासपर्यन्तम् रामायण महाभारतमधिकृत्य गद्यपद्यमिश्रितं आनन्दकन्दचम्पूकाव्यम् इति प्रख्यातं वर्तते ।

## श्रीमन्मित्रमिश्रस्य परिचयः

साम्प्रतं मुद्रिताया आनन्दकन्दाभिधायाश्च चम्पूकाव्यस्यनिर्माता श्रीमन्मित्रमिश्रो लोकविदितवैदुष्यो गोपाचल (ग्वालियर्) निवासी, दूरवारकुलोत्पन्नः पंचगौडान्तःपातिनीं सनाढ्याभिधानां ब्राह्मणजातिमलंचक्रे । श्रीमतो हंसपण्डितस्य तनुजः परशुराममिश्रोऽस्य पिता । सोऽयं परशुराममिश्रोऽपि यज्ञादि कर्मप्रवणः काशीनिवासिनः श्रौतस्मार्तक्रियाकलापनिपुणाच्चण्डीश्वराख्याः गुरोः विद्या अध्यैत इति मित्रमिश्रेण स्वयमेव वीरमित्रोदयाख्यधर्म शात्रनिबन्धारम्भे विवृतम् । एतस्य ग्रन्थाः -

1. वीरमित्रोदयः (धर्मशास्त्रनिबन्धे) एतस्य द्वाविंशतिप्रकाशितम् ।
2. याज्ञवल्क्यास्मृतिटीका (वीरमित्रोदयाख्या)
3. वीरमित्रोदयः (गणितग्रन्थ)
4. आनन्दकन्दचम्पूः (प्रस्तुतेयम्)
5. गूडार्थदीपिकाटीकाव्याख्यानम् ।

इदानीम् आनन्दकन्दचम्पूकाव्यस्य प्रकाशितं किन्तु **गूडार्थदीपिकाटीका** एतावता न प्रकटितम् । अत एव अहं विद्यावारिधि उपाद्यर्थं अयं ग्रन्थम् स्वीकृत्य "आन्दकन्दचम्पूव्याख्याः गूडार्थदीपिकाटीकायाः पाठसमीक्षात्मक सम्पादनम्" । इति विषयम् अधिकृत्य अद्ययनम् कुर्वन् अस्मि ।

## उपसंहारः

**नवभारतनिर्माणार्थं संस्कृतचम्पूकाव्येषु आनन्दकन्द**चम्पूकाव्यस्य वैशिष्ट्यलक्षणप्रयोजनम्, मातृका, ग्रन्थकर्तस्य च परिचयः इत्यादीन् विचारान् ज्ञात्वा इदं कार्यं षट्वर्षेषु (२०१५-२१) समापनीयमिति मम अभिप्रायः । तत्र प्रथमं सावधानपठनेन शुध्दं कंचन पाठं निर्णीय तस्य टंकनम्, ततश्च तत्रत्यानां विषयाणाम् अवगमनम्, ततः तदुपरि विमर्शः, ततश्च अनुबन्धस्य विरचनमिति अंशचतुष्टयं सोपानक्रमेण कर्तव्यत्वेन चिन्तितम् । यत् सम्प्रति प्रतिकृत्येकं मयासादितं तद्विषये प्रागेव उक्तम् । तस्मात् न तदधिकृत्य पुनरुच्यते । तदेवं प्रसिध्देषु चम्पूकाव्येषु आनन्दकन्दचम्पूकाव्यस्य व्याख्यानमेतत् सम्पाद्य संशोद्य संशोद्य च ग्रन्थो अयं संरक्षणीय इति धिया अत्र प्रवृत्तास्मि । अयं च मे श्रमो अवश्यं सफलो भवतीति मम गाढो विश्वासः ॥

# आधुनिक काव्येषु नारी

## (Aadhunika Kaavyeshu Naari)

**Dr. Narayanaswamy M.S.**
डा. नारायणस्वामि एम्.एस्
संशोधना सहायकाः
कर्नाटकसंस्कृतविश्वविद्यालयः,
चामराजपेटे, बेंगलूरु-५६००१८.
narayanaswamy76731@gmail.com.
दूरवाणी संख्या: 8317428412

- पीठिका।

पुरा पुराणकाले मातुः स्थानं पर्याप्तं वरिष्टम् आसीत् । मातुरेव प्रतिभावमर्तत यत् सा कृत्स्नस्य परिवारस्य घटकसदस्यानां सुखदुःखयोर्दत्तावधाना भवेत् तथा परिवारस्य उन्नतये स्वसन्तानं सदुपदेशं ददाना स्यात् । पितुः कृत्यमर्थोपार्जने पर्यवसन्नमभूत् चेत्, मातुरिदं कार्यमासीद् यत्तस्य समुचितो विनियोगो भवेदिति । माता खलु परिवारस्य रक्षिका, मातैव सन्तानस्य प्रथमोऽभ्यार्हितश्च गुरुः । परिवारस्थाः कन्याः मातुरेव गान्धर्वकला-(संगीतापरपर्याय)-गृहनृत्यकलाप्रभृतिशिक्षाः सम्प्राप्नुवन् । मातृस्नेहकुम्भसिक्तः कुटुम्बविटपः पुष्पितः पलितश्च समपद्यत । मातुराश्रयं प्राप्यैव परिवारस्य सर्वे सदस्या उन्नत्यभिमुखं क्षिप्रपदं निधातुं प्राभुवन् । यावत्पर्यन्तं गृहलक्ष्मीर्मातृत्वं नासादयत् तावत्पर्यन्तं गार्हस्थ्यस्य वास्तविकी दशा तस्या अपरिचितकल्पैवबभूव । पुराणकाले यत्र यत्र जनन्या गृहस्थाश्रमे वर्णानमुपलभ्यते तत्र तत्र जनन्याः श्रेष्टताया वर्णनं प्राप्यत एव ।

**मातृत्वरूपम् –**

ब्रह्मवैवर्तपुराणे मातृत्वस्य महतां वर्णयन्तो मातरं पूजार्हां प्रत्यपादयन्-

> जनको जन्मदातृत्वात् पालनाच्च पिता स्मृतः ।
> गरीयान् जन्मदातुश्च योऽन्नदाता पिता मुने ॥
> तयोः शतगुणे माता पूज्या मान्या च वन्दिता ।
> गर्भधारणपोषाभ्यां सा च ताभ्यां गरीयसी ॥

एवं पुराणेषु मातुः महत्वं समुपवर्णितम् । तेषाञ्च वर्णनानाम् अध्ययनं तदानीन्तनसमाजं प्रदर्शयेदिति तत्र यथामति प्रयते ।

वेदपुराणादिषु काव्यनाटकेषु बह्वीनां स्त्रीणामुल्लेखोवर्तते । यथा- लक्ष्मी-सरस्वती-पार्वती- शचीत्यादयः देव्यः, रम्भा-मेनका-ऊर्वश्यादयः अप्सरसः, गार्गी-मैत्रयी-वागम्भ्रिण्यादयः ऋषिकाः, आरुन्धती-अदिती-देवहूत्यादयः मुनिपत्न्यः, अनसूया-सावित्री-द्रौपदी-मण्डोदर्यादयः पतिव्रताः, मोहिनी-दुर्गा-काली-सीतादयः अवतारस्त्रियः, कैकयी-मन्थरादयः गुर्मागवर्तिन्यः, ताटकी-शूर्पणखादि घोरराक्षस्य इत्यादि । अपराः व्रताचरणे स्थिताःसाध्व्यः, उत्सवेषु गीतनृत्यविनोदैः हृश्यन्त्यः नागरकस्त्रियः, कलाभिज्ञाः, कन्याः, राजकुमार्य, दास्यः, मातरः, मुग्धाः, कष्टसन्त्रस्ताः, धीराः, चतुराः, गूढाचारिण्यः, प्रव्राजिकाः, वेश्याः, इत्यादीनि विविधानिः स्त्रीपात्राणि दृश्यन्ते । सर्वासां नामनां पट्टिकाकरणं सुदीर्घ कष्तृतमं च कार्यम् । केनोक्तं भारतीयसाहित्यस्त्रीपात्रमप्रधानमिति ? वस्तुतः स्त्रीपुरुषपात्रयोः तुल्यं वैविध्यं, स्वारस्यं, प्राधान्यं च दृश्यन्ते । स्त्रीपात्रवर्णने तु संस्कृतकवीनां शैलीपुरुषवर्णनस्यापेक्षया सूक्ष्मतमासुन्दरतमा एव । केवलं काव्यनाटकेषु वर्णितानां कसांश्चनस्त्रीणामेवगुणचरित्रविशेषानाम्लघुवर्णनम् अत्र क्रियते ।

संस्कृतकाव्यनाटकेषु काव्यनायिकाः विशेषतयाविरहिण्यः, पतिव्रताः, योगिन्यः, परमसाध्वीमण्यश्च । कष्टान्, नष्टान्, विरहं, निराशां च सोढ्वाधर्मपालनेदृढाः चलन्ति यथा रामायणकाव्ये सीता, महाभारते द्रौपदी च । अन्यतमाः विरहण्यः वियोगमनुभवन्त्यः नाथस्यप्रात्यर्थं तपमानाः यथा कालिदासस्य शकुन्तलामालविके, भासस्य वासवदत्ता, हर्षदेवस्य सागरिका च । असाधारणां तपस्यामाचरन्त्यः योगिन्यः अपवर्णिताः यथा – कुमारसम्भवकाव्ये पार्वती, रामायणे स्वयंप्रभा-वेदवती- अनसूयाः च । स्वार्थनिमित्तं घोरदुश्चरितानि आचरन्त्यः कैकेयी-मन्थरा-शूर्पणखादयः अपि रामायणकथायां विद्यमानाः विद्यन्ते । विरहिणीषु नायिकासु नवोढा-मध्यमा-प्रौढादि नायिकाभेदाः, तथा अभिसारिका-खण्डिता-वासकसञ्चिका-प्रौषितभर्तृ-काद्यष्टनायिकाभेदाः अपि कल्पना स्वारस्येण विपुलैः अलङ्कारोक्तिभिश्चवर्णिताः । कदाचित् एकस्मिन्नेव पात्रे विविध भावावस्थानां सञ्चारः दृश्यते ।

सन्दर्भानुसारं नायिकामुग्धा, धीरा, खण्डिता, विरहिणी, अनुपमयोगिनी, सिध्दा, वासकसज्जिका वा भवति । यथा कुमारसम्भवकाव्ये राजकन्यकापार्वतीशिवस्य पत्नीभवतुं मनसा इच्छति, हिमाचलेतपश्चरन्तं शिवं प्रसादयितुं श्रध्दया सेवते च । किन्तु

यदा मन्मथवसन्तयोः त्वरयाप्रमादेन च शिवः कृध्दो भूत्वा ततः निर्गच्छति, पार्वती अपमान निराशाभ्यां "खण्डिता" भवति, विरहस्य विविधावस्थाः अनुभवति । केषाञ्चन अष्टनायिकाभेदानां भावसञ्चारः तस्यां दृश्यते । अन्तेसुखभोगान्विहाय असाधारणं तप आचरति, सप्त ऋषिभिश्चधर्मवृध्देतिमान्या भवति । तपः फलनेशिवस्यानुग्रहं प्राप्य विवाहमङ्गलायसज्जीभूय शिवपत्नी भवति । अग्रेनवोढावस्थायां लाज्जाभीत्यानन्दादि भावेषुकल्ललिताभवति च ।

संस्कृतकाव्यनायिकानां वैशिष्ट्यं नाम अर्थकामयोः अपेक्षायां सत्यामपिधर्ममार्ग कदापि नातिगच्छन्ति । मनोभिलाषां प्राप्तुं धर्मरीत्याचरन्त्यः विरहंकष्ट-नष्टानि च सोढ्वा, आत्मशक्त्यादुर्गतिमतिक्रम्य-यशस्वि भवन्ति । काव्यनाटकोल्लिखितेषु स्त्रीपात्रेषु वर्णनातिशये सत्यपिवेदपुराणानां देवी-ऋषिका-साध्वीमणीनां मौन्नत्यं-सात्विकताच एतेष्वपि तुल्यं दृश्यते एव । अपि च विवाहकाले उपयुज्यमानमन्त्राः स्त्रीणां प्राशस्त्यं वर्णयन्ति । विवाहता सा गृहस्वामिनीपदम् अलमकरोत् । " न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" इति स्मृतिः । पतिसेवानिरता सा पतिव्रता इति प्रख्याता ।

**पद्मपुराणे यथा –**

सुवेषं या नरं दृष्ट्वा भ्रातरं पितरं सुतम् ।
मन्यते च परं साध्वी सा च भार्या पतिव्रता ॥ इति ।

किं बहुना पतिव्रतायाः स्मरणमात्रेण् महापापादेव मुक्तिं प्राप्नोति नरः इत्यपि श्लाध्यते –

अहल्या द्रौपदी तारा कुन्ती मण्डोदरी तथा ।
पञ्चकन्याः स्मरेन्नित्यं महापातकनाशनम ॥ इति ।

एवं वैदिकयुगे नारी धार्मिक, आध्यात्मिक, सामाजिक क्षेत्राणां नेतृत्वं वहन्ति स्म । सभ्यतायाः विकासे सा प्रयत्नशीला आसीत् । अस्मात्कारणात् नारी ऋषितुल्या जाता महाभारते स्त्रीणां गौरम् एवं निर्दिष्टम् –

अर्थभार्या मनुष्यस्य भार्या श्रेष्टतमा सखा ।
भार्या मूलं त्रिवर्गस्य भार्या मूलं तरिष्यतः ॥ इति ।

तस्मिन् समये नारी स्वव्यक्तित्वात् विभूषिताऽसीत् । किरातार्जुनीयमहाकाव्ये वर्णनमस्ति यत् वनिता निजभर्तारमपि उपदिशति स्म । द्रौपद्या उपदेशेनोत्तेजिताः पाण्ड्वाः कौरवैः समयुध्यन्त इति च प्रसिध्दम् । काव्यप्रयोजनवर्णनसमये कान्तासंहिततया उपदेशयुजे इति कान्तायाः उपदेशः संहिता शब्देन निर्दिष्टं दृश्यते ।

सर्वविधं कष्टं सहमानाऽपि स्वसन्ततिं सुरक्षति, पालयति, पुषयति च। स्वसन्ततिं प्रति न कदापि जननी चित्तविकृतिं याति । माता कदापि कुमाता न भवति । अतः शंकराचार्यैः उक्तम् कुपुत्रो जायेत क्वचिदपि कुमाता न भवति इति । अत एव जननी जन्मभूमिश्च स्वर्गादपि गरीयसी इति । माता परं दैवतम्, मातृ देवो भव इत्यादिरूपेण श्रुतिरपि श्रावयति।

एवञ्च भारतीयशिक्षाव्यवस्थायां संस्कृतेः संरक्षणार्थमपि नारीणां योगदानमावाश्यकमासीत् । तदा कथामाध्यमेन बालकस्य कल्पनाशक्तेः विकासाय चेष्टा अभूत् । ऋग्वेदे(५-४७-६) उक्तं यन्माता स्वपुत्राय बुध्दिं वस्त्रं निर्मातीति अस्माद् बालकस्य बुध्दिवर्धनार्थं मातुरवदानं जायते। ध्रुवस्य भक्तिमार्गस्य पथप्रदर्शनं तस्य माता अकरोत्(भाग- पृ, ४-६) । सत्यं कथयितुं माता कथं प्रवर्तयति स्म, तस्योदाहरणं छान्दोग्योपनिषदि सत्यकेतोर्जाबालेः ब्रह्मचर्याश्रम प्रवेशप्रसङ्गे दृश्यते । गोत्रं न ज्ञात्वा माता उक्तवती – अहं न जानामि, तव गोत्रं किं भवतीति । जाबाला मम नाम च सत्यकामो भवति । अतः स्वनाम सत्यकाजाबाला कालिदासविरचितं कुमारसम्भवं नाम महाकाव्यं महाकाव्येषु महत्वपूर्णं स्थानं भजते । प्राचीनाः अर्वाचीनाः च विभिन्ना व्याख्याकाराः एतस्य काव्यस्य व्याख्या व्यरचयन् । तासु व्याख्यासु अरूणगिरिनाथस्य प्रकाशिकाटीका, नारायणस्य विवरणटीका इत्यद्याः समुपलभ्यन्ते । एतत्काव्यार्थप्रकाशनाय वङ्गदेशीयः सर्वशास्त्रेषु निष्णातः व्याख्याकारः भरतसेनः सुबोधाटीकां व्यरचयत् । सा टीका एतावत्कालं यावत् अप्रकाशितैव अस्ति । एतस्याः टीकायाः वङ्गलिप्यां Asiatic Society Sanskrit college मातृकागारयोः षण्मातृकाः उपलभ्यन्ते।

महाकाव्यव्याख्यासु भरतसेनस्य सुबोधायाः विशिष्टं स्थानमस्ति, विशेषतः भारतस्य पूर्वप्रान्ते रचितासु व्याखासु सुबोधा एषा नितरां गरिमाणं भजते। अयं भरतसेनः १७ शतके आसीदिति अनुमीयते । एषा व्याख्या सरला, मनोहारिणी, पद-पदार्थद्योतिनी, काव्यार्थग्राहिणी च।

- **पार्वतीचित्रणस्य वैशिष्ट्यम्।**

भारतीय संस्कृतौ स्त्रियः महत्त्वपूर्णं स्थानं विलसति। तदेव मनुना उच्यते –

यत्रा नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाःक्रियाः॥

कुमारसम्भवे महाकविः कालिदासः पार्वतीचरित्रवर्णनव्याजेन, स्त्रीधर्मस्य, सतीधर्मपरम्पराम् आचारं च प्रदर्शयत् । अस्यां सुबोधा-व्याख्यायां तादृशं कालिदासकृतं वर्णनं स्मृत्यादिवाक्योदाहरणद्वारा प्रमाणितमस्ति ।

- उपसंहारः ।

एवं जगति पूजनीय स्थाने स्थितायां स्त्रीं अस्माभिः परिरक्षितव्या इति । पुत्रस्य सर्वं कष्टं सोढक पुत्रम् रक्षति । तादृशी मता यथा पुत्रः सुखेन भवेत् तथा पोषयति । पुत्रस्य किञ्चिदपि वेदना भवति चेदपि न शक्नोति सोढुं माता । अतः स्त्रीणां स्थानं असदृशं विद्यते । तादृश्याः मातुः विचारस्य उल्लेखः आधुनिक काव्येषु बहु विस्तृतया अस्माभिः अवलोकितम् । अस्मदमातरः देवतास्वरूपिण्यःस्त्रियः गौरवरूपेण द्रष्टव्यमिति मदाशा ।

- आकर ग्रन्थाः –


  - ऋग्वेदः । बनारस् विश्वविद्यालयः प्रकाशनम् – १९६० ।
  - किरातार्जुनीयम् भारविविरचितम् । मल्लिनाथकृत सञ्जीविनीव्याख्यासहितः । चौखाम्ब विद्याभवनम् – १९७३ ।
  - मनुस्मृतिः । चौखाम्ब विद्याभवनम् , वारणासि – १९६३ ।
  - रामायणम् वाल्मीकिविरचितम् । आशुतोशमित्रकृतया सुरभारती व्याख्या सहितः,
  - महाभारतम् , मातायाख्यानसहितम् । नवदेहली, तृतीय संस्करणम् – २००५ ।
  - कालिदासस्य रघुवंशः, कुमारसम्भवम्, शिशुपालवधम्, चौखाम्ब विद्याभवनम् , वारणासि – १९७३ ।


-----------------------------------ooooo--------------------------------------

# काव्यशास्त्रे रसस्वरूपम्

## Kavyashastre Rasaswarupam

Dr. Narayanaswamy M.S
डा. नारायणस्वामी एम्.एस्
संशोधना सहायकः(Academic)
परिक्षाविभागः कर्नाटकसंस्कृत विश्वविद्यालयः
narayanaswamy76731@gmail.com
8317428412

- पीठिका ।

सुरभारती इयं संस्कृतभाषा हृद्या रमणीया च । देववाणी इति संस्तूयमाना असौ भाषा मधुरा च वर्तते । महदिदं संस्कृतवाङ्मयम् । तत्र काव्यानि सन्ति भूयांसि । तथैव काव्यैः चतुर्वर्गफलप्राप्तिरपि भविता । मानवः काव्यरसास्वादनेन विना जीवितुं न शक्नोति । अतः काव्यं जीवनस्य जीवातुभूतमेव । अतः काव्यस्वरूपनिरूपकाः अलङ्कारशास्त्रग्रन्थाः प्रायशः आदौ काव्यप्रयोजनानि एव परिशीलयन्ति । काव्यस्य आत्मभूतस्य रसस्य विषयः विस्तरतया लक्षणग्रन्थेषु प्रतिपाद्यन्ते ।

नाट्यशास्त्रे दशरूपके च रूपकाणां रसानां च विचारः दृश्यन्ते । श्रृङ्गारतिलकं रसतरङ्गिणी इत्यादिग्रन्थाः रससिद्दान्तं प्रतिपादयन्ति । रसः एव काव्यास्वादनार्थः सहृदयानाकर्षयति । रसं विना काव्यं नीरसं भवति । अतः रसः अपि प्रमुखं काव्यतत्त्वं भवति । एवञ्च संस्कृतसाहित्यं द्विधा कथ्यते । लौकिकसाहित्यं वैदिकसाहित्यञ्चेति । वैदिकसाहित्यं नाम चत्वारः वेदाः भवन्ति लौकिकसाहित्ये दृष्यं श्रव्यं च इति भेदद्वयं वर्तते । दृष्यं नाम नाटकादीनि भवन्ति । श्रव्ये गद्यं पद्यं चम्पूरिति भेदत्रयं भवति । एवञ्च दृश्यश्रव्यात्मकानि काव्यानि आनन्दस्यन्दीनि इति । एवं काव्यानि सहृदयानन्दजनकानि वर्तन्ते । रसाः आस्वाद्यमानाः भवन्ति काव्ये । रसाः नवधा –

श्रृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुत संज्ञौ च इत्यष्टौ नाट्ये रसाः स्मृताः ॥

इत्युक्त्वा शान्तोऽपि नवमो रसः इत्यब्रवीत् । एवं नवरसाः काव्येषु आस्वाद्यमानाः भवन्ति । अत्र वेदानां, **अलङ्कारशास्त्रे नाट्यशास्त्रे च वेदोपनिषत्सु रस विचारः, अलङ्कारशास्त्रे तथा उपनिषत्सु रसस्वरूपम्** ज्ञातुं प्रयत्नं कुर्मः ।

- **अलङ्कारशास्त्रे नाट्यशास्त्रे च वेदोपनिषत्सु रस विचारः**

अयं रसशब्दः सर्वप्रथमं वेदेषु उल्लखितः । यथा – "**दधानः कलसे रसम्**" इति ऋग्वेदे यथा वा "**रसो वै सः, रसं हेवायं लब्ध्वाऽऽनन्दी भवति**" इति तैत्तिरीयोपनिषदि अन्तर्भवति । काव्यपरम्परायां कविताकामिन्याः निखिलेभ्यो वाच्यार्थ – लक्ष्यार्थ – गुण – रीति – वक्रोक्ति – औचित्यादिभ्यो भिन्नः आत्मस्थानीयः रसः । अयमेव रसपारिजातः काव्यस्य शाखाप्रशाखारूपान् सर्वान् भेदप्रभेदान् उज्जीवयति, समाह्लादयति, रसयति चेति समालोचकाः वदन्ति । अनेन विना काव्यं रसिकानां कृते नीरसमनादृतं च भवति ।

यथोच्यते –

**साधुपाके विनास्वाद्यं भोजनं निर्लवणं यथा ।**
**तथैव निरसं काव्यं स्यान्नो रसिकातुष्टये ॥**

अथ लौकिकविलक्षणस्यास्य रसस्य काव्यात्मत्वं सर्वैरङ्गीकृतम् । यथा - **"न हि रसादृते कश्चिदर्थः प्रवर्त्तते"** इति भरतमुनिः प्रतिपाद्य, स्वीकरोति यद्रस एव हि परमोत्कृष्टतया आस्वाद्यते । " रसादयो हि द्वयोरपि तयोः जीवितभूताः" इति उद्घोषयन् –

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥(ध्वन्यालोके)

इत्यपि च प्रकटयन् आनन्दवर्धनाचार्यः रसस्यैव काव्यात्मत्वं प्रतिपादयति । **"विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः"** इति रससूत्रकारः भरतमुनिः उक्तवान् । **"रसेनैव सर्वं जीवति काव्यम्"** इति अभिनवगुप्तमहाभागेन उच्यते । **"काव्यस्यात्मनि रसादिरूपे न कस्यचिद्विमतिः"** इति महिमभट्टः उक्तवान् ।**"ये रसस्याङ्गिनो धर्माः"** इति मम्मटेन उच्यते **"वाक्यं रसात्मकं काव्यं"** इति साहित्यदर्पणकारेन पण्डितेन विश्वनाथेन उक्तम् । तथा च रसस्य काव्यात्मत्वमङ्गीकृतम् । अग्निपुराणेऽपि **"वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्"** इत्यनेन रसस्य आत्मस्थानीयत्वमेव स्वीक्रियते ।

- **अलङ्कारशास्त्रे तथा उपनिषत्सु रसस्वरूपम् ।**

अथ कोऽयं रसः ? किं वा तस्य स्वरूपम् ? कथं वा तस्य निष्पत्तिः ? इत्यादिषु प्रश्नेषु समुपजृम्भमाणेषु इति भरतेन उच्यते । " **यथा हि नाना व्यञ्जनसंस्कृतमन्नं भुञ्जानः रसानास्वादयन्ति सुमनसः पुरुषाः हर्षादींश्चाधिगच्छन्ति तथा नाना भावाभिनयव्यञ्जितान् वागङ्गसत्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः प्रेक्षकाः पुरुषाः हर्षादींश्चाधिगच्छन्ति । तस्मान्नाट्ये रसेति अभिख्याता**" इति । अत्र भोजनस्य कटुककषायतिक्तादिलौकिकरसवत् नाटकस्यापि रत्यादिस्थायिभावा रसा इत्युच्यन्त इति भरतस्य वचनात् ज्ञायते ।

काव्यप्रकाशकर्त्रा मम्मटेनोक्तं यत् – विभावानुभावव्यभिचारिभावैर्यः व्यज्यते सः स्थायिभावरूप रस इत्युच्यते । तद्यथा – "**व्यक्तस्स तैर्विभावाद्यैः स्थायिभाव रसः स्मृतः**" इति ।

विश्वनाथेन उक्तम् –

विभावेनानुभावेन व्यक्तः संचारिणा तथा ।
रसतामेति रत्यादिः स्थायीभावः रसः स्मृतः ॥(साहित्यदर्पणे)

विभावानुभावव्यभिचारिभावानां संयोगाद् व्यञ्जनाव्यापारेण अभिव्यञ्जितः सहृदयाणां हृदि विद्यमान रत्यादिस्थायीभाव रस इत्युच्यते । अतः रसः ज्ञानकाले एव तिष्ठति, अज्ञानकाले न विद्यते । अतोऽनित्य रसः। परमात्मा शुद्धचैतन्यमस्ति । अज्ञानावरणमुक्तः, सत्यशिवसुन्दरस्वरूपः, सच्चिदानन्दमयोऽयं परमात्मा । सत्यं, ज्ञानममृतञ्च तस्य स्वरूपम् । एतदेव दार्शनिकरहस्यम् । तदेव साहित्यदर्पणकारेण विश्वनाथेन प्रतिपादितम् । यथा –

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः
वेद्यान्तरस्पर्शशून्यो ब्रह्मानन्दसहोदरः ।
लोकोत्तरचमत्कारः प्राणः कैश्चित्प्रमातृभिः
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥

अत्र रसस्याष्टविधस्वरूपं प्रतिपादितमस्ति । यथा –

१ - सत्त्वगुणोपेतः रसः ।

२ - अखण्डः रसः(विभावादिसमूहालम्बनत्वादेकः) ।

३ - आनन्दमयः रसः ।

४ - ज्ञानस्वरूपः रसः ।

५ - स्वतः प्रकाशमानः रसः ।

६ - वेद्यान्तरसम्पर्करहितः रसः ।

७ – ब्रह्मसाक्षात्कारसदृशः रसः ।

८ – अलौकिकाश्चर्यजीवनरूपः रसश्च ।

यथा वेदान्ताधिकारी नित्यनैमित्तिककाम्यकर्मणि प्रवृत्तस्सन् परमात्मानमधिगच्छति तथैव वाच्यवाचकलक्षणमात्रकृतश्रमाः काव्यार्थतत्त्वज्ञा एव तं ज्ञातुं प्रभवन्ति । तदुक्तं ध्वन्यालोककारेण-

शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते ।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम् ॥

येषां काव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते सहृदयसंवादभाजः सहृदयाः भवन्ति । त एव तं रसं ज्ञातुं प्रभवन्ति इति । तदुक्तं पुनः साहित्यदर्पणे - **"पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्"** इति । एवं जीवात्मा सहृदयो वा परमात्मानं रसं वा लब्ध्वाऽऽनन्दीभवति । अतः रस आनन्दस्वरूपः । यथा अज्ञानस्य विनाशेन ज्ञानालोकमाध्यमेन जीवात्मा परमात्मानं प्राप्नोति, तथैव भग्नावरणाचिद्विशिष्टो रत्यादिः स्थायी भावो रस आस्वाद्यते सहृदयैः । रसगङ्गाधरे उच्यते – **"रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः"** इति । **"रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति"** इति तैत्तरीयोपनिषदि उच्यते । इत्यनेन ज्ञायते यद् यदा अयं जीवात्मा परमात्मनः साक्षात्कारं करोति तदा सः तस्मिन् परमात्मानि लीनो भवति । अयमेव परमात्मा रस इत्युच्यते । इमं रसं लब्ध्वा जीवात्मा परामानन्दं प्राप्नोति । अमुञ्च रसं जीवात्मा अभिन्नत्वेनास्वादयति । अस्योदहरणं जगन्नाथेन स्पष्टं प्रतिपादितम् । यथा – **"यथा शरावादिना पिहितः दीपः शरवादि निवृत्तौ स्वयं प्रकाशते सन्निहितान् पदार्थान् अपि प्रकाशयति, तथा आत्मचैतन्यमपि रत्यादीन् भावान् प्रकाशायति"** इति ।

रसस्य स्वरूपं प्रकाशयता मम्मटाचार्येण उक्तं यत् – लोकव्यवहारे स्थायिनः रत्यादेः भावस्य यानि लक्षणादीनि तथा चकोरादीनि कारणानि भवन्ति, तथा यानि निर्वेदादीनि सहकारिणि भवन्ति तानि यदि काव्येषु नाटकेषु कविभिः वर्णितानि भवन्ति तर्हि ते यथाक्रमं विभावाः, अनुभावाः, व्यभिचारिभावाश्च कथ्यन्ते । एवं मम्मटेन प्रतिपादितं । क्रिस्तशक अष्टादशशतके जातः विश्वेश्वरपंडितपर्यन्तं ये ये आलङ्कारिकाः सञ्जाताः तैः सर्वैरपि रसः प्रतिपादितः । काव्यात्मभूतः सहृदयानन्दःसन्दोहः रसः एव इति विपश्चिदां आलङ्कारिकाणाम् मतिः ।

- उद्देशः

आधुनिक समाजे मानवेभ्यः वेदोपनिषदां, काव्यशास्त्रे च विद्यमानणाम् रसाणां परिचयम् कारयितुम् अयं प्रयत्नः एवं उद्देशश्च विद्यते।

- उपसंहारः –

एवं काव्यरसाः सहृदयैः काव्येषु आस्वाद्यमानाः भवन्ति । अनेके आलङ्कारिकाः नवरसानां स्वरूपं स्वमत्यानुसारं ऊचुः । अन्ये केचन अष्टौ स्थायिनः तद्रसां च उररीचक्रुः । आलङ्कारिकैः यथामति चर्चितार्थः अयं "काव्यशास्त्रे रसः" इति विषयः । सहृदयानन्द जनकः ब्रह्मानन्दसहोदरः वर्तते।

काव्यं यशसे व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्ता संहिततया उपदेशयुजे॥

इत्युक्तेः अनुसारं सर्वे काव्यशास्त्रारधकाः भवामः वयं सहृदयाः।

- **सन्दर्भग्रन्थाः –**


१. साहित्यदर्पणः – लक्ष्मीव्याख्योपेतः आचार्य कृष्णमोहन शास्त्री, चौखाम्भा संस्थानं, वारणासी। १९८५।
२. काव्यालङ्कारः – रुद्रटप्रणीतः नमिसाधुटिप्पणीसमेतः, मोतीलाल बनारसीदास, दिल्ली। १९८८
३. रसगङ्गाधरः – मर्मप्रकाशटीकासहितः, मोतीलाल बनारसीदास, जवहारनगर, दिल्ली। १९८३।
४. भरतनाट्यशास्त्रम् – भरतमुनिः, चौखाम्ब संस्कृत् सीरिज् आफीस्, बनारस।१९४०
५. ध्वन्यालोकः – आनन्दवर्धनः, लोचन – बालप्रियसमेतः, चौखाम्भा संस्कृत् सीरिज् आफीस्, बनारस।१९४।
६. रसतरङ्गणी- गोपालदुत्तः मुंधीराम मनोहरलाल्, मुद्रणालयः नव देहली।
७. काव्यप्रकाशः – मम्मटः, चौखाम्ब प्रकाशनं, वारणासी। १९८।
८. संस्कृतवाङ्मयान्तः प्रवेशिका – डा. सोमनाथ दाशः, Sanskrit Advanced Research Institute(SARI),Odisha-01. 2017।

९. संस्कृत कविकाव्य परिचयः – डा. सुब्राय ईश्वर हेगडे, ईश्वरप्रकाशन २८५/एफ् ६, १प्लोर् ५ क्रास् उत्तरादिमठ मार्गः, मैसूरु – ०४।

१०. वैदिकसाहित्य का संस्कृतिः(हिन्दी) – उपाध्याय बलदेव काशि, शारदमन्दिर वारणासी-२०१७।

--------------------------------०००००० ----------------------------------